# श्री यन्त्रोद्धारक हनुमत्स्तोत्रं

नमामि दुतम् रामस्य सुखदम् च सुरद्रुमम् ।
पीनवृत्त महाबाहुम् सर्व शत्रु निवारणं ॥

नानारत्न समायुक्तं कुन्डलादि विराजितम् ।
सर्वदाभीष्ट दातारम् सतां वै दृढ माहवे ॥

वासिनम् चक्र तीर्थस्य दक्षिणस्य गिरौ सदा ।
तुंगाम्बोधि तरंगस्य वातेन परिशोभिते ॥

नाना देशा गतैः सद्भिः सेव्यमानम् नृपोत्तमैः ।
धूप दीपादि नैवेद्यैः पंचखाद्यैश्च शक्तितः ॥

व्रजामि हनुमत् पादं हेमकान्ति समप्रभं ।
व्यासतीर्थय तींद्रेण पूजितं च विधानतः ॥

त्रिवारम् यः पठेन्नित्यम् स्तोत्रं भक्त्या द्विजोत्तमः ।
वांछितं लभतेऽभीष्टं षण्मासाभ्यन्तरं खलु ॥

पुत्रार्थी लभते पुत्रं यशोर्थी लभते यशः ।
विद्यार्थी लभते विद्याम् धनार्थी धनमाप्नुयात् ॥

सर्वथा मास्तु सन्देहो हरिः साक्षी जगत्पतिः ।
यः करोत्यत्र संदेहम् सयाति नरकं ध्रुवं ॥

। इति श्रीव्यास तीर्थ विरचितम् श्री यन्त्रोद्धारक हनुमत्स्तोत्रं सम्पूर्णम् ।